One Year PG in

Temple Culture & Management

अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातकोत्तरकार्यक्रमः - मन्दिरसंस्कृतिः प्रबन्धनञ्च

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली - 110002

Curriculum Development Committee for One year PG (Temple Culture & Management)

Prof. Deviprasad Tripathi

Chairperson of the Committee and Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi 🖂 devi@slbsrsv.ac.in

Dr. Pankaj Kumar S Rawal

Associate Professor, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi 🖂 Pankaj.yatkrupa@gmail.com

Dr. Shubham Sharma

Asst. Professor, Department of Jyotirvigyan, Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya, Ujjain 🖂 mpdrshubham@gmail.com

Dr. PTG Ranga Ramanujacharyulu

Asst. Professor, National Sanskrit Univursity, Tirupati, Andhra Pradesh - 517507, 🖂 rracharya76@gmail.com

Prof. Dinakar Marathe

Convenor of the committee and Professor, Kavikulguru Kalidas Sanskrit University, Ratnagiri

Campus, Ratnagiri, Maharashtra – 415612 🖂 dinakarmarathe@gmail.com

विषयसूची

कार्यक्रमस्य परिचयः

(Introduction of the Program)

एम्.ए.ऑनर्स् (मन्दिरसंस्कृतिः प्रबन्धनञ्च) एकवर्षस्य कार्यक्रमः विद्यते। अस्मिन् कार्यक्रमे आहत्य द्विसत्रार्धे भविष्यन्ति।

अर्हता - चतुः वार्षिकात्मकं शास्त्री, बीए इति परीक्षोत्तीर्णाः तत्समकक्ष्यापरीक्षोत्तीर्णाः छात्राः एन्.टि.ए. द्वारा आयोज्यमानपरीक्षामाध्यमेन उत्तीर्य अस्मिन् एम्.ए.आनर्स् (मन्दिरसंस्कृतिः प्रबन्धनञ्च) कार्यक्रमे प्रवेष्टुम् अर्हाः। अत्र द्विसत्रार्धयोः स्वशास्त्रीयविषयाः **(Major),** नैतिकमूल्याधारितपाठ्यक्रमाः **(VAC),** कौशलाधारितपाठ्यक्रमाः **(SEC)** च भविष्यन्ति।

एतैः साकं अन्तिमसत्रार्धे प्रशिक्षुतासेवा **(Internship)** पाठ्येतरगतिविधयः **(ECA)** लघुशोधप्रबन्धः (Dissertation) च भविष्यन्ति।

कार्यक्रमस्य उद्देश्यानि

(Program Objectives)

1. भारतीयज्ञानपरम्पराधारेण मन्दिरसंस्कृतेः परिचयप्रदानम्।
2. भारतीयसंस्कृतेः विषये ज्ञानप्रदानम्।
3. मन्दिरस्थापत्यपरम्परायाः परिचयप्रदानम्।
4. मन्दिरप्रबन्धनविषये ज्ञानप्रदानम्।
5. अर्चनापद्धतेः लोकन्यासव्यवस्थायाश्च विषये मार्गदर्शनम्।
6. पूजाविधि-सङ्गीत-चित्रकलादिकौशलविकासाय मार्गदर्शनम्।
7. धार्मिकसंस्कारणां नैतिकमूल्यानाञ्च लोके प्रचारः।
8. भारतीयज्ञानपरम्पराविषयेषु शोधदृष्टिप्रदानम्।
9. मठ-प्रधानानाम्, आचार्याणां, सेवकानां च कार्यव्यवस्थायाः विवेचनम्।
10. यात्रा–उत्सवयोः आयोजनकौशलं, नियमनं तथा सुरक्षाविधानस्य अवगमनम्।
11. पूजासामग्रीप्रबन्धनस्य पर्यावरण–सौहार्द्रदृष्ट्या नूतनप्रयोगान् अवगमनम्।
12. भारतीयमन्दिरपरम्परायाः ऐतिहासिकविकासक्रमस्य संघर्षकालस्य च अवगमनम्।
13. मन्दिरसंस्कृतेः शिक्षाकेन्द्ररूपेण भूमिकायाः अवगमनम्।
14. भारतेतरदेशेषु संस्थापितानां सनातनमन्दिराणां उत्पत्तेः विकासस्य च ज्ञानम्।
15. धार्मिकपर्यटनक्षेत्रे व्यवस्थापनकौशलं, आयोजनं, जनसम्पर्कशास्त्रस्य च परिचयः।

कार्यक्रमस्य परिणामाः

(Program Outcomes)

कार्यक्रमस्य परिणामः - 1	**भारतीयमूलानि -** छात्राणां भारतीयां संस्कृतिं प्रति आस्थावृद्धिर्भविष्यति। मन्दिराणां महत्त्वं तथा मूर्तिपूजायाः महिमानं ज्ञास्यन्ति। मन्दिराणां सामाजिकं योगदानं सनातनपरम्परां च ज्ञास्यन्ति। गुरुकुलमठमन्दिराणां शिक्षापद्धतिः, तस्य प्रबन्धनतत्त्वानि च ज्ञातुं समर्थाः भविष्यन्ति। सर्वत्र धर्मस्य, संस्कृतेः, समरसभावस्य, विश्वबन्धुत्वस्य च संवर्धनाय मन्दिरपरम्परायाः महत्त्वं प्रतिपादयितुं समर्थाः भविष्यन्ति। धर्मसंवर्धनलोककल्याणसांस्कृतिकसमन्वयजनजागरणेषु मन्दिरपरम्परायाः योगदानं प्रतिपादयितुं समर्थाः भविष्यन्ति।
कार्यक्रमस्य परिणामः - 2	**भारतीयज्ञानपरम्परा** – छात्राः भारतीयज्ञानपरम्परायाम् अभिमानवन्तः भविष्यन्ति। शास्त्राणां यथार्थस्वरूपं ज्ञात्वा पुरुषार्थचतुष्टयं ज्ञास्यन्ति। भारतीयशिल्पस्थापत्यकलायाः परिचयं प्राप्स्यन्ति। कथाप्रवचनपरम्परया भारतीयाध्यात्मिकमूल्यानि ज्ञास्यन्ति। मूर्तेः तत्प्रकारान् कस्याः मूर्तेः किं च महत्त्वं पूजया च किं फलं तज्ज्ञास्यन्ति।
कार्यक्रमस्य परिणामः - 3	**भविष्यवाद्युपागमः** - छात्राः जीवदयां विज्ञाय परस्परसौहार्द्रतां धारयिष्यन्ति। तीर्थयात्रया दानेन अर्थतन्त्रं च संक्रमितं भविष्यति। आबाल्यात् संस्काराणां सेचनं भविष्यति। मन्दिरप्रबन्धनस्य प्राचीन-आधुनिकरूपाणां तुलनात्मकदृष्ट्या विवेचनं कर्तुं प्रभविष्यन्ति। उत्सवप्रबन्धनस्य विविधतत्त्वानि — योजना, आयोजनं, व्यवस्थापनं, मूल्याङ्कनं च — प्रायोगिकरूपेण ज्ञातुं समर्थाः भविष्यन्ति। पूजासामग्रीसंवर्धनं, भण्डारणम् एवं लेखासंविधानं यथायोग्यं कर्तुं शक्ष्यन्ति। मन्दिरसंस्कृतेः संरक्षणे शासनसमाजयोः सहभागस्य महत्त्वं प्रतिपादयितुं शक्ष्यन्ति।
कार्यक्रमस्य परिणामः - 4	**बहुशास्त्रीयम् -** छात्राः वेदोक्तकर्मकाण्डस्य महत्त्वं वैज्ञानिकत्वं वेत्स्यन्ति। मन्दिरसंस्कृत्या गीतनृत्यवाद्यकलायाः व्यापृतिर्भविष्यति। मन्दिरसंस्कृत्या विविधशास्त्राणां विषयान् ज्ञास्यन्ति। भारतीयव्रतपर्वोत्सवमहोत्सवान् तद्रहस्यानि च ज्ञास्यन्ति। भारतीयाचारविचारान् पवित्रतां च ज्ञास्यन्ति। समाजे मन्दिरस्य प्रभावं योगदानं च वेत्स्यन्ति। जलस्थलवृक्षवनस्पतिलतापत्रपुष्पफलानां मन्दिरसंस्कृतौ महत्त्वं योगदानं सदुपयोगं च ज्ञास्यन्ति। भूगोलपरिस्थित्यनुसारं मन्दिररचनायाः भिन्नरूपाणि (उत्तरीय–दक्षिणीय–पर्वतीय–सागरीय) विवेचयितुं शक्ष्यन्ति।
कार्यक्रमस्य परिणामः - 5	**वृत्तिप्रदानक्षमता -** मन्दिरसंस्कृतिसन्दर्भे वृत्तिपरकज्यौतिषवास्तुशास्त्रयोर्महत्त्वमनिवार्यत्वं ज्ञास्यन्ति। धार्मिकक्षेत्रेषु पर्यटकमार्गदर्शकरूपेण वृत्तिप्राप्त्यर्थं समर्थाः भविष्यन्ति। एषः कार्यक्रमः छात्राणां कृते

	उद्योगप्राप्तौ, उद्योगप्रारम्भाय च निमित्तं भवितुमर्हति। धार्मिकपर्यटनस्य प्रबन्धनं, योजना, विपणनप्रक्रियतां च व्यवहारतः अनुप्रयोजयितुं शक्ष्यन्ति।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MAJOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
मठपरम्परा-अखाडापरम्परायां मन्दिरप्रबन्धनम्	✓	✓	✓	✓	✓	✓	✓
धार्मिकी यात्रा उत्सवप्रबन्धनं च	✓	✓	✓	✓	✓	✓	✓
पूजासामग्रीणां परिचयः प्रबन्धनं च	✓	✓	✓	✓	✓	✓	✓
प्रवचनसत्सङ्गमहाप्रसाद-प्रबन्धनम्	✓	✓	✓	✓	✓	✓	✓
प्रचारप्रसारस्य धार्मिकपर्यटनस्य प्रबन्धनम्	✓	✓	✓	✓	✓	✓	✓
मन्दिरपरम्परा सङ्घर्षः पुनरुत्थानं च	✓	✓	✓	✓	✓	✓	✓
मन्दिरसंस्कृतौ विद्यादानपरम्परा	✓	✓	✓	✓	✓	✓	✓
भारतेतरसनातनमन्दिरपरम्परा	✓	✓	✓	✓	✓	✓	✓

चितस्वशास्त्रविषयकपाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR DSE COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
धार्मिकसम्मेलन-परम्परा प्रबन्धनं च	✓	✓	✓	✓	✓	✓	✓
प्रमुखमन्दिराणां प्रबन्धनस्याध्ययनम्	✓	✓	✓	✓	✓	✓	✓
मन्दिरव्यवस्थापने भूगोलस्य पर्यावरणस्य च प्रभावः	✓	✓	✓	✓	✓	✓	✓
पौराणिकदेवालय-प्रबन्धनम्	✓	✓	✓	✓	✓	✓	✓
आगमादिग्रन्थेषु पूजादिविधानम्	✓	✓	✓	✓	✓	✓	✓
मन्दिरपरम्परायाः सामाजिकं योगदानम्	✓	✓	✓	✓	✓	✓	✓
मन्दिरसंस्कृतौ कलासंरक्षणम्	✓	✓	✓	✓	✓	✓	✓

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 1.1: मठपरम्परा-अखाडापरम्परायां मन्दिरप्रबन्धनम्	4	600-699
2		प्रधानः 1.2: धार्मिकी यात्रा उत्सवप्रबन्धनं च	4	600-699
3		प्रधानः 1.3: पूजासामग्रीणां परिचयः प्रबन्धनं च	4	600-699
4		प्रधानः 1.4: प्रवचनसत्सङ्गमहाप्रसादप्रबन्धनम्	4	600-699
5	द्वितीयसत्रार्द्धस्य प्रधानपाठ्यक्रमाः	प्रधानः 2.1: प्रचारप्रसारस्य धार्मिकपर्यटनस्य प्रबन्धनम्	4	600-699
6		प्रधानः 2.2: मन्दिरपरम्परा सङ्घर्षः पुनरुत्थानं च	4	600-699
7		प्रधानः 2.3: मन्दिरसंस्कृतौ विद्यादानपरम्परा	4	600-699
8		प्रधानः 2.4: भारतेतरसनातनमन्दिरपरम्परा	4	600-699

चितस्वशास्त्रविषयकपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमाः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमसत्रार्द्धस्य चितस्वशास्त्रविषयक-पाठ्यकमाः	चितस्वशास्त्रविषयः 1.क.1: धार्मिकसम्मेलनपरम्परा प्रबन्धनं च	4	600-699
2		चितस्वशास्त्रविषयः 1.क.2: प्रमुखमन्दिराणां प्रबन्धनस्याध्ययनम्	4	600-699
3		चितस्वशास्त्रविषयः 1.क.3: मन्दिरव्यवस्थापने भूगोलस्य पर्यावरणस्य च प्रभावः	4	600-699
4		चितस्वशास्त्रविषयः 1.क.4: पौराणिकदेवालयप्रबन्धनम्	4	600-699
5	द्वितीयसत्रार्द्धस्य चितस्वशास्त्रविषयक-पाठ्यकमाः	चितस्वशास्त्रविषयः 2.क.1: आगमादिग्रन्थेषु पूजादिविधानम्	4	600-699
6		चितस्वशास्त्रविषयः 2.क.2: मन्दिरपरम्परायाः सामाजिकं योगदानम्	4	600-699
7		चितस्वशास्त्रविषयः 2.क.3: मन्दिरसंस्कृतौ कलासंरक्षणम्	4	600-699

प्रधानपाठ्यक्रमाः

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (Semester - 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: मठपरम्परा-अखाडापरम्परायां मन्दिरप्रबन्धनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयमठपरम्परायाः ऐतिहासिक-धार्मिक-सामाजिक-पृष्ठभूमिज्ञानम्।
2. अखाडापरम्परायाः सङ्गठनात्मकस्वरूपस्यावगमनम्।
3. मन्दिरप्रबन्धनस्य तात्त्विकप्राशासनिकाध्यात्मिकायामानां बोधनम्।
4. मठ-प्रधानानाम्, आचार्याणां, सेवकानां च कार्यव्यवस्थायाः विवेचनम्।
5. मन्दिरसंवर्धन-सम्पत्ति-रक्षणं-धार्मिककार्यसंविधानस्य च कुशलतया नियोजनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयमठ-अखाडापरम्परायाः मूलतत्त्वानि स्पष्टतया व्याख्यातुं शक्ष्यन्ति।
2. मन्दिरप्रबन्धनस्य प्राचीन-आधुनिकरूपाणां तुलनात्मकदृष्ट्या विवेचनं कर्तुं प्रभविष्यन्ति।
3. मठानां सामाजिक-धार्मिक-शैक्षिकभूमिकायाः महत्त्वं विश्लेषयितुं शक्ष्यन्ति।
4. अखाडानां संगठनात्मकनियमनं, आचारसंहितां च व्यवस्थिततरूपेण प्रतिपादयितुं शक्ष्यन्ति।
5. मन्दिरप्रबन्धनक्षेत्रे उत्तरदायित्वेन, नैतिकतया, सेवाभावेन च कार्यं सम्पादयितुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	मठपरम्परा-अखाडापरम्परायां मन्दिरप्रबन्धनम्	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मठाम्नायः। **श्रेयोऽङ्कः १**

- मठशब्दस्याशयः।
- प्रमुखशाङ्करमठानां परिचयः।
- आचार्याः, मठपरिक्षेत्रं, सरस्वतीतीर्थादिदशनामानि मठसम्बन्धीदिशानिर्देशाश्च।

अन्वितिः २. चतुःसम्प्रदायाः। **श्रेयोऽङ्कः १**

- श्री-ब्रह्म-सनकादि-रुद्रसम्प्रदायाः।

अन्वितिः ३. अखाडापरिचयः। **श्रेयोऽङ्कः १**

- अखाडापरम्परा -
    - दशनामीअखाडा।
    - अनीअखाडा।

अन्वितिः ४. मन्दिरप्रबन्धने मठानां भूमिका। **श्रेयोऽङ्कः १**

- विविधमठानां पीठानाञ्च परिचयः -
    - तोताद्र्यादिरामानुजमठाः।
    - वीरशैवमठः।
    - वेलूरमठः।
    - गोरक्षपीठः।
- जोशीमठ-बद्रीनाथधाममध्ये सम्बन्धः।
- जगन्नाथमन्दिरगोवर्द्धनमठयोः सम्बन्धः।
- द्वारकाधीशधामशारदापीठयोः सम्बन्धः।
- मन्दिरप्रबन्धने पूजने च मठानां भूमिका।
- मन्दिरेषु महन्त-बैरागी-जोगी-परम्पराः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मिश्र, डॉ रामजी, *शंकराचार्य और उनकी परम्परा,* इलाहाबाद : मधुलिक प्रकाशन।
2. वेदांती महन्त हरिशंकरदास (संपादक), *चतुः सम्प्रदाय दिग्दर्शन*, जयपुर : हंसा प्रकाशन।
3. मिश्र, डॉ. रामजी, *रामानुजाचार्य और उनकी परम्परा*, इलाहाबाद : मधुलिक प्रकाशन।
4. तिवारी प्रो. विवेकानन्द, *सनातन धर्म एवं परम्परा के रक्षक अखाड़े*, वाराणसी : लुमिनस बुक्स इण्डिया।

सहायकाः ग्रन्थाः (Additional Readings)

1. छजलानी अभय, *अमृत कुंभ सिंहस्थ*, इन्दौर : नई दुनिया।
2. निगम डॉ. अनीता, *पर्वतीय प्रदेश का प्राकृतिक एवं सांस्कृतिक बहु-दृश्य*, आगरा : निखिल पब्लिशर्स एण्ड डिस्ट्रीब्यूटर्स।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: धार्मिकी यात्रा - उत्सवप्रबन्धनं च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतस्य धार्मिकयात्राणां पावनपरम्परायाः इतिहाससहितं ज्ञानम्।
2. विविधेषु उत्सवेषु धार्मिक-सामाजिक-आर्थिकदृष्ट्या व्यवस्थाप्रणाल्याः अवबोधनम्।
3. यात्रा-उत्सवयोः आयोजनकौशलं, नियमनं, तथा सुरक्षाविधानस्य अवगमनम्।
4. तीर्थयात्रायाः आध्यात्मिकमहत्त्वं, संस्कृतिपरम्परायाः संवर्धनस्य च विवेचनम्।
5. धार्मिकसमारोहेषु लोकसहभागस्य समन्वय-समरसभावस्य च विकासे प्रेरणम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भारतीयधार्मिकयात्राणां ऐतिहासिकं, सांस्कृतिकं च स्वरूपं स्पष्टतया विवेचयितुं शक्ष्यन्ति।
2. उत्सवप्रबन्धनस्य विविधतत्त्वानि, योजना, आयोजनं, व्यवस्थापनं, मूल्याङ्कनं च प्रायोगिकरूपेण ज्ञातुं समर्थाः भविष्यन्ति।
3. धार्मिकयात्रा-उत्सवयोः सामाजिकसामरस्यमूल्यं पर्यावरणसुरक्षायाः दृष्ट्या अवगन्तुं शक्ष्यन्ति।
4. प्राचीनपरम्परायाः अनुगुण्येन आधुनिकव्यवस्थायाः समन्वयं स्थापयितुं शक्ष्यन्ति।
5. धर्मसंवर्धनाय, सांस्कृतिकैक्याय, जनसेवायै च यात्रा-उत्सवप्रबन्धनं उत्तरदायित्वेन सम्पादयितुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	धार्मिकी यात्रा-उत्सवप्रबन्धनं च	4	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. प्रमुखयात्राणां परिचयः। **श्रेयोऽङ्कः १**

- जगन्नाथरथयात्रा।
- अवन्तीपञ्चेशानीयात्रा।
- बद्रीनाथडोला/दोलायात्रा।
- केदारनाथडोला/दोलायात्रा।
- सोमनाथयात्राविधि।

- पण्ढरीनाथयात्रा।
- देवघरयात्रा (काँवडयात्रा)
- अमरनाथयात्रा।
- कैलास-मानसरोवरयात्रा।
- चिन्तामणयात्रा (लोके चिन्तामणजत्रा)
- वैष्णोदेवीयात्रा।
- रामदेवरायात्रा।
- हिमाचले देवडोला/दोलायात्रा।
- नन्दादेवीयात्रा।

अन्वितिः २. प्रमुखपरिक्रमाणां परिचयः। श्रेयोऽङ्कः १

- व्रजचतुरशीतिक्रोशपरिक्रमा।
- मथुरापरिक्रमा।
- गोवर्धनपरिक्रमा।
- अयोध्यापरिक्रमा।
- कामदगिरिपरिक्रमा।
- काशीपरिक्रमा।
- नर्मदापरिक्रमा।

अन्वितिः ३. प्रमुखोत्सवाः। श्रेयोऽङ्कः १

- उज्जयिनीनगरपूजनम्।
- ब्रह्मोत्सवः।
- ज्येष्ठाभिषेकः।
- मकरज्योतिः, शबरीमला च।
- वैष्णवमन्दिरेषु अन्नकूटमहोत्सवः।
- दोलोत्सवः, हिण्डोलः च।
- तीर्थस्थलेषु रामनवमी-जन्माष्टमी-शिवरात्रि-दुर्गापूजन-गणेशोत्सवादीनामायोजनम्।
- हरिमन्दिरे एकादशीजागरणम्।
- व्रजमण्डले होलीमहोत्सवः।

अन्वितिः ४. सूचना सतर्कता च। श्रेयोऽङ्कः १

- अन्तर्जालपुटप्रबन्धनम्।
- ध्वनिविस्तारयन्त्रद्वारा सूचना।

- पङ्क्तिनियामकव्यवस्था (Barricading)
- जनसम्मर्दप्रबन्धनम्।
- जलापूर्तिप्रबन्धनम्।
- दर्शनसमयप्रबन्धनम्।
- स्वच्छताप्रबन्धनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. *स्कन्दपुराण*, वाराणसी : चौखम्बा कृष्णदास अकादमी।
2. *पद्मपुराण*, वाराणसी : चौखम्बा कृष्णदास अकादमी।
3. *वराहपुराण*, गोरखपुर : गीताप्रेस।
4. भारती, राधाकान्त, एवं कुमार, डॉ. प्रदीप, *हमारे तीर्थस्थल*, हिन्दूलॉजी बुक्स।

सहायकाः ग्रन्थाः (Additional Readings)

1. George Richard, *Marketing Tourism and Hospitality,* Palgrave macmillan

काठिन्यस्तरः
600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: पूजासामग्रीणां परिचयः प्रबन्धनं च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. पूजासामग्रीणां धार्मिक-वैदिक-आगमिकमहत्त्वस्य ज्ञानम्।
2. विविधानां पूजोपकरणानां (पत्र-पुष्प-धूप-दीप-नैवेद्यादीनां) शास्त्रीयविधानस्य अवबोधनम्।
3. पूजासामग्रीसंग्रहण-संरक्षण-वितरणस्य च यथाशास्त्रं नियोजनम्।
4. मन्दिरेषु पूजासामग्रीप्रबन्धनस्य स्वच्छता-शुचिता-नियमबद्धतादृष्ट्या अध्ययनम्।
5. पूजासामग्रीप्रबन्धनस्य पर्यावरण-सौहार्द्रदृष्ट्या नूतनप्रयोगान् अवगमनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. पूजासामग्रीणां प्रकारान्, तेषां शास्त्रीयं प्रयोजनं च अवगन्तुं शक्ष्यन्ति।
2. पूजायाः अनुष्ठानक्रमे सामग्रीविनियोगस्य सूक्ष्मविवरणं विवेचयितुं समर्थाः भविष्यन्ति।
3. पूजासामग्रीसंवर्धनं, भण्डारणम् एवं लेखासंविधानं यथायोग्यं कर्तुं शक्ष्यन्ति।
4. पूजासामग्रीप्रबन्धनं शुचित्वेन, नियमेन एवम् उत्तरदायित्वेन सम्पादयितुं समर्थाः भविष्यन्ति।
5. पर्यावरणरक्षणं च आध्यात्मिकसेवा च उभयं समन्वयेन पूजासामग्रीप्रबन्धने अन्वेतुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	पूजासामग्रीणां परिचयः प्रबन्धनं च	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. पूजनपात्राणां परिचयः। **श्रेयोऽङ्कः १**

- योग्यधातुः।
- प्रस्तरोपकरणम्।
- काष्ठोपकरणम्।
- स्थाली-चमस-पञ्चपात्र-आचमनपात्र-कलश-पिधानपात्र-अर्घ्यपात्र-दीप-दीपस्तम्भिका-अग्निपात्र-चामर-व्यजनादयः।
- पवित्रीकरणनियमाः।

अन्वितिः २. यज्ञोपकरणानि यज्ञसामग्री च। **श्रेयोऽङ्कः १**

- प्रोक्षणी-प्रणीता-स्रुचि-स्फ्य-स्रुवाद्युपकरणानि।
- हविर्द्रव्याणि।

अन्वितिः ३. गन्ध-पुष्प-दीपादिसामग्री। **श्रेयोऽङ्कः १**

- अष्टगन्धं, धूपप्रकाराश्च।
- कस्तूरी-काश्मीरजादिद्रव्याणि।
- घृत-तैल-कार्पासादिद्रव्याणि।
- दीपदिशा दीपस्थानञ्च।
- देवतानाङ्कृते विहिताविहितपुष्पविचारः।

अन्वितिः ४. वस्त्राभूषणम्। **श्रेयोऽङ्कः १**

- वस्त्रविधानम्।
- प्रमुखाभूषणानि (किरीटः, हारः)
- मुक्तावलीप्रकारः।
- श्रृङ्गारसामग्री (राजोपचारे)
- क्रीडनकाः।
- प्लोतवस्त्रम्।
- शय्यावस्त्रम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. मिश्र, मित्र, *वीरमित्रोदय पूजाप्रकाश*, वाराणसी : चौखम्बा संस्कृत सीरीज।
2. गौड़, पं. श्री वेणीराम, *यज्ञमीमांसा*, वाराणसी : चौखम्बा विद्याभवन।
3. मिश्र, पं. लालबिहारी, *नित्यकर्म पूजाप्रकाश*, गोरखपुर : गीताप्रेस।

सहायकाः ग्रन्थाः (Additional Readings)

1. शर्मा, पं. रमेशचन्द्र, *सर्वकर्म अनुष्ठान प्रकाश*, मयूरेश प्रकाशन।
2. हरेन्द्र, *श्रीरामजन्मभूमि घटनाक्रम*, नोशन प्रेस।

काठिन्यस्तरः 600-699	श्रेयोऽङ्काः - 4 होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: प्रवचन–सत्सङ्ग-महाप्रसादप्रबन्धनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. प्रवचनस्य, सत्सङ्गस्य, भोजस्य च धार्मिक-सामाजिकमहत्त्वज्ञानम्।
2. प्रवचनसमारोहेषु आयोजनकौशलं, समयनियोजनं, श्रोतृव्यवस्थां च बोधनम्।
3. सत्सङ्गेषु आध्यात्मिकवातावरणनिर्माणं, वक्तृ-श्रोतृ-संवादरूपसंयोजनं च अध्ययनार्थं विवेचनम्।
4. महाप्रसादप्रबन्धनस्य शुचित्वं, व्यवस्थापनं, अन्नसंवर्धनं च शास्त्रीयदृष्ट्या अवगमनम्।
5. प्रवचन-सत्सङ्ग-भोजसंविधानस्य सेवा-समर्पण-समरसभावप्रेरकं तत्त्वं बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. प्रवचन-सत्सङ्गयोः आयोजनतत्त्वानि, नियोजनप्रक्रियाः च सम्यक् अवगन्तुं शक्ष्यन्ति।
2. वक्तृ-श्रोतृ-सम्बन्धस्य प्रभावशालीसंवादरूपं तथा प्रसारणकौशलं विकसितुं समर्थाः भविष्यन्ति।
3. महाप्रसादप्रबन्धनस्य शास्त्रीयमूल्यानि — शुचिता, समता, सेवा - प्रायोगिकरूपेण अनुप्रयोजयितुं शक्ष्यन्ति।
4. धार्मिकसमारोहेषु अनुशासनं, समयपालनं, एवं सौहार्द्रसंवर्धनं कुशलतया नियोजयितुं शक्ष्यन्ति।
5. प्रवचन-सत्सङ्ग-भोजप्रबन्धनं धर्मसंवर्धनस्य, समाजैक्यस्य, एवं सेवाभावस्य साधनरूपेण उपयोजयितुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	प्रवचन-सत्सङ्ग-भोजप्रबन्धनम्	3	1	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. भारतीयसत्सङ्गपरम्परा। श्रेयोऽङ्कः १

- वैदिकवाङ्मयपरिचयः।
- वैदिकसंवादसूक्तानि।
- वैदिकाख्यानानि।
- उपनिषद्दर्शनम्।
- शास्त्रार्थपरम्परा।
- नैमिषारण्यसत्सङ्गः।
- जनमेजयनागयज्ञे महाभारतकथनम्।
- द्राविडदेशे आल्वारसत्सङ्गाः।

अन्वितिः २. पुराणपरिचयः कथा परम्परा च। श्रेयोऽङ्कः १

- पुराणानि तथा उपपुराणानि (विषयसूची माहात्म्यञ्च)
- पुराणप्रवचनस्य प्राचीनपरम्परा।
- पुराणश्रवणादीनां नियमाः (वक्तृ-श्रोतृ तथा स्थानादिदिशानिर्देशाः)
- मन्दिरपरिसरे कथायाः महत्त्वम्।

अन्वितिः ३. कथासत्सङ्गविधाः। **श्रेयोऽङ्कः १**

- रामकथाश्रवणपरम्परा।
- प्रमुखरामायणानि।
- रामलीला, रासलीला, यक्षगानं, हरिकथा-आदीनां परम्पराः।

अन्वितिः ४. धार्मिकमहाप्रसादप्रबन्धनम्। **श्रेयोऽङ्कः १**

- अन्नप्रशंसा अन्नदानमाहात्म्यं च।
- महाप्रसादशुद्धौ नियमाः।
- पाचक-पर्यवेशकप्रबन्धनम्।
- सामग्रीसङ्कलनम्।
- भोजनशाला तथा पङ्क्तिप्रबन्धनञ्च।
- प्रपाप्रबन्धनम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. उपाध्याय, बलदेव, *संस्कृत वाङ्मय का बृहद् इतिहास*, लखनऊ : उत्तरप्रदेश संस्कृत संस्थान।
2. *नारदपुराण*, गोरखपुर : गीताप्रेस।
3. *श्रीमद्भागवतपुराण*, गोरखपुर : गीताप्रेस।
4. त्रिपाठी, वशिष्ठनारायण, *भारतीय लोकनाट्य*, दिल्ली : वाणी प्रकाशन।
5. *विष्णुधर्मोत्तरपुराण*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. *स्कन्दपुराण*, चौखम्बा कृष्णदास अकादमी।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (Semester - 2)

प्रधानः पाठ्यक्रमः (Major) 2.1: प्रचारप्रसारस्य धार्मिकपर्यटनस्य प्रबन्धनम्

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. धार्मिकपर्यटनस्य तात्त्विकं, सांस्कृतिकं, सामाजिकं च महत्त्वं शास्त्रीयदृष्ट्या अवबोधनम्।
2. देवालयतीर्थसंस्कृतिस्थलानां प्रचारप्रसारोपायानां व्यवस्थापनदृष्ट्या अध्ययनाय प्रेरणम्।
3. धार्मिकपर्यटनक्षेत्रे व्यवस्थापनकौशलं, आयोजनं, जनसम्पर्कशास्त्रस्य च परिचयः।
4. भारतीयधर्मपरम्परायाः संरक्षणाय, आर्थिकविकासाय च पर्यटनं साधनरूपेण अवगमनम्।
5. तीर्थपर्यटनं, यात्रापरम्परा, एवं भक्तजनसेवा इत्यादीनां समुचितप्रबन्धनस्य प्रतिपादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. धार्मिकपर्यटनस्य शास्त्रीयं स्वरूपं, तात्त्विकं महत्त्वं च विवेचयितुं शक्ष्यन्ति।
2. तीर्थक्षेत्राणां मन्दिरसंस्कृतेः संरक्षणाय प्रचारप्रसारस्य नूतनसाधनानां प्रयोगं अवगन्तुं समर्थाः भविष्यन्ति।
3. धार्मिकपर्यटनस्य प्रबन्धनं, योजना, विपणनप्रक्रियतां च व्यवहारतः अनुप्रयोक्तुं शक्ष्यन्ति।
4. धर्मसंस्कृति-पर्यटन-आर्थिकविकासस्य पारस्परिकसम्बन्धः सम्यग् बोधयितुं शक्ष्यन्ति।
5. मन्दिरसंस्कृतेः लोकव्याप्तये धार्मिकपर्यटनं साधनरूपेण स्थापयितुं निपुणाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.1	प्रचारप्रसारस्य धार्मिकपर्यटनस्य प्रबन्धनम्	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मन्दिरप्रचारतन्त्रव्यवस्थापनम्। **श्रेयोऽङ्कः १**

- मन्दिरवेबसाइटप्रबन्धनं (मन्दिरदर्शनसमयः, नियमावली, पौराणिक/पारम्परिकमहत्त्वम्, सेवासुविधासूचना, दानग्रहणप्रणाली)
- पर्वोत्सवानां समाचारपत्र-सोशलमीडियादिद्वारा प्रचारः।
- पर्यटकमार्गदर्शकानां भूमिका।

अन्वितिः २. धार्मिकस्थलयात्राप्रबन्धनम्। **श्रेयोऽङ्कः १**

- तीर्थदर्शनयोजनायां परिक्षेत्रचयनम्।
- चारधामयात्रा (उत्तराखण्डे)
- चारधामयात्रा (बद्रीनाथ-जगन्नाथपुरी-रामेश्वरम्-द्वारका)
- व्रजमण्डलयात्रा।
- अयोध्यादर्शनम्।
- काशी-विन्ध्यवासिनी-प्रयागमण्डलानि।
- वैष्णोदेवी-ज्वालादेव्यादिदेवीस्थानमण्डलानि।
- यात्रासुविधायां आरक्षणादीनां व्यवस्था।
- स्थलानुरूपेण वाहनपरिवर्तनतन्त्रम्।

अन्वितिः ३. आवासभोजनप्रबन्धनम्। श्रेयोऽङ्कः १

- मन्दिरपरिक्षेत्रे होटल-धर्मशाला-होमस्टेत्यादीनां प्रबन्धनं (शुल्कम्, सुविधाविवरणम्)
- मन्दिरपरिक्षेत्रे भोजनालयः (विशेषता-भोजनसामग्री-सुविधा-शुल्कादीनां विवरणम्)

अन्वितिः ४. परिसरसज्जायां पर्यटनदृष्टिः। श्रेयोऽङ्कः १

- मन्दिरेषु सूचनाफलकानां सम्यक्प्रयोगः।
- मन्दिरपरिसरेषु सततस्वच्छता एवं पवित्रता च।
- सेल्फी/निजचित्र-छायाचित्रकर्षणस्थली फोटोग्राफीपाइन्ट।
- प्रतीकात्मकमूर्तयः।
- सङ्ग्रहालयः प्रदर्शनी च।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Haware, Suresh, *Temple Management*, New Delhi: Prabhat Prakashan Pvt. Ltd.
2. भारती, राधाकान्त, एवं कुमार, डॉ. प्रदीप, *हमारे तीर्थस्थल*, दिल्ली: हिन्दूलॉजी बुक्स।
3. सहाय, शिवस्वरूप, *संग्रहालय की ओर*, दिल्ली: मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. George Richard, *Marketing Tourism and Hospitality,* Palgrave macmillan

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.2: मन्दिरपरम्परा सङ्घर्षः पुनरुत्थानं च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. भारतीयमन्दिरपरम्परायाः ऐतिहासिकविकासक्रमस्य संघर्षकालस्य च अवगमनम्।
2. सामाजिक-राजनैतिक-धार्मिककारणैः मन्दिरसंस्कृतेः उपशमनं कथं जातम् इति विश्लेषणम्।
3. मन्दिररक्षणे भारतीयजनमानसस्य योगदानं, पुनर्निर्माणचेष्टाश्च बोधनम्।
4. पुनरुत्थानयोजनानां आधुनिकरूपं, शासननीतिं, धर्मसंवर्धनस्य उपायांश्च अध्ययनाय प्रेरणम्।
5. संघर्षे अपि धर्मपरम्परायाः स्थैर्यं, आस्थां, पुनर्जागरणस्य च प्रतिपादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मन्दिरपरम्परायाः संघर्षेतिह्यं स्पष्टतया विवेचयितुं शक्ष्यन्ति।
2. मन्दिरसंरक्षणे धर्मनिष्ठायाः, समाजैक्यस्य च महत्त्वं अनुभवितुं समर्थाः भविष्यन्ति।
3. प्राचीनदेवालयानां पुनरुत्थानाय आवश्यकं प्रबन्धनकौशलं, नीतिपरिज्ञानं च अवगमिष्यन्ति।
4. मन्दिरसंस्कृतेः संरक्षणे शासनसमाजयोः सहभागस्य महत्त्वं प्रतिपादयितुं शक्ष्यन्ति।
5. संघर्षपरम्परायाः माध्यमेन भारतीयधर्मसंस्कृतेः अमरत्वं, पुनरुत्थानं च बोधयितुं समर्थाः भविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.2	मन्दिरपरम्परा संघर्षः पुनरुत्थानं च	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मन्दिरविध्वंसस्येतिहासः। **श्रेयोऽङ्कः १**

- मूर्तिभञ्जकानां साम्राज्यविस्तारः।
- मन्दिरेषु वैदेशिकानाम् आक्रमणम्।
- स्थानीयशासकैः मन्दिरविध्वंसः।

अन्वितिः २. प्रमुखविनष्टमन्दिराणां परिचयः। **श्रेयोऽङ्कः १**

- रामजन्मभूमिः, केशवदेवमन्दिरं- मथुरा, काश्यां ज्ञानवापी, वङ्गक्षेत्रे आदिनाथमन्दिरम्।

अन्वितिः ३. पुनःस्थापनस्य प्राचीनप्रमाणानि। **श्रेयोऽङ्कः १**

- सोमनाथः।
- अयोध्या।
- उज्जयिनी।
- काशी।
- मथुरामण्डलम्।
- श्रीकूर्मनाथमन्दिरम्।

अन्वितिः ४. मन्दिरसंस्कृतेः पुनरुत्थानस्य प्रयासाः। **श्रेयोऽङ्कः १**

- मन्दिरसंरक्षणे हिन्दूशासकानां भूमिका (विक्रमादित्यः, भोजदेवः, भीमदेवः सोलंकी, देवी अहिल्याबाईहोल्करः, श्रीकृष्णदेवरायः)
- मन्दिरसंरक्षणे समाजस्य भूमिका।
- मन्दिरसंरक्षणे सतां भूमिका।
- मन्दिरसंस्कृतेः पुनरुत्थानम्।
- सोमनाथः।
- रामजन्मभूमिः।
- ओण्ढा-नागनाथः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. Goel, Sita Ram, *Hindu Temples: What Happened to Them*, New Delhi: Voice of India.
2. सर्यवंशी, सरनाम सिंह, *अंखियन देखी अयोध्या (रामजन्मभूमि का प्रमाणिक इतिहास)*
3. राजपुरोहित, भगवतीलाल, *आदि विक्रमादित्य*।
4. राजपुरोहित, भगवतीलाल, *भोजराज*, वाराणसी : विश्वविद्यालय प्रकाशन।
5. गुगालिया, एच. एस., देवी *श्री अहिल्याबाई*, सूर्यभारती प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. राजपुरोहित, डॉ भगवतीलाल, *राजा भोज,* जयपुर : पब्लिकेशन स्कीम।

काठिन्यस्तरः 600-699

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 2.3: मन्दिरसंस्कृतौ विद्यादानपरम्परा

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. मन्दिरसंस्कृतेः शिक्षाकेन्द्ररूपेण भूमिकायाः अवगमनम्।
2. गुरुकुलमठमन्दिरसंस्थानानां विद्यादानपरम्परां ऐतिहासिकदृष्ट्या विवेचनम्।
3. आचार्यशिष्यपरम्परया ज्ञानसंवर्धनस्य तत्त्वज्ञानम्।
4. मन्दिरेषु आयोजितानां पाठशालानां, शास्त्राध्ययनानां, प्रवचनपरम्परायाः प्रबन्धनस्य बोधनम्।
5. विद्यादानस्य आध्यात्मिकं, सामाजिकं, सांस्कृतिकं च महत्त्वस्य प्रतिपादनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. मन्दिरसंस्कृतेः शिक्षासंवर्धनकर्तृभूमिकां स्पष्टतया अवगन्तुं शक्ष्यन्ति।
2. गुरुकुलमठमन्दिराणां शिक्षापद्धतिः, तस्य प्रबन्धनतत्त्वानि च ज्ञातुं समर्थाः भविष्यन्ति।
3. शिष्यपरम्परायाः माध्यमेन ज्ञानसंरक्षणस्य धर्माधिष्ठानं विवेचयितुं शक्ष्यन्ति।
4. आधुनिकशिक्षणव्यवस्थायाम् अपि मन्दिरपरम्परायाः आदर्शान् प्रयोगरूपेण स्थापयितुं समर्थाः भविष्यन्ति।
5. विद्यादानं केवलं शिक्षाक्रिया न, अपितु संस्कृतिसंवर्धनस्य, धर्मरक्षणस्य च साधनम् इति बोधयितुं शक्ष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 2.3	मन्दिरसंस्कृतौ विद्यादानपरम्परा	4	0	0	4

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. मन्दिरेषु विद्याशालापरम्परा। **श्रेयोऽङ्कः १**

- विद्याशालालक्षणम्।
- प्राचीनविद्याशालाः (यथा- धारानगर्यां वाग्देवीमन्दिरम्)
- ग्रामीणक्षेत्रेषु मन्दिरप्राङ्गणे विद्याशालापरम्परा।

अन्वितिः २. मठ-मन्दिरयोः आचार्यपरम्परा। **श्रेयोऽङ्कः १**

- गुरोः आचार्यस्य च लक्षणानि।
- शास्त्रलेखनपरम्परा।

- टीका भाष्यञ्च।
- मन्दिरेषु प्रचलिते भक्तिपदमध्ये शिक्षा।

अन्वितिः ३. धार्मिकग्रन्थालयः। **श्रेयोऽङ्कः १**

- शास्त्रशालालक्षणम्।
- मन्दिरसम्बद्धाः प्राचीनग्रन्थालयाः।
- काञ्च्याम्।
- वाराणस्याम्।
- भद्राचले।
- श्रीरङ्गवैष्णवग्रन्थशाला।
- पद्मनाभमन्दिरे।

अन्वितिः ४. मन्दिरसम्बद्धाः वर्तमानविद्यासंस्थानानि। **श्रेयोऽङ्कः १**

- सोमनाथे।
- तिरुपतौ।
- महाकालेश्वरवैदिकशोधसंस्थानम्।
- द्वारिकायाम्।
- जगन्नाथपुर्याम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. जुगनू, श्रीकृष्ण, *विश्वकर्मवास्तुशास्त्र*, दिल्ली : परिमल संस्कृत ग्रंथमाला।
2. सहाय, डॉ शिवस्वरूप, *प्राचीन भारत का सामाजिक एवं आर्थिक इतिहास (हिन्दू सामाजिक संस्थाओं सहित)*, दिल्ली : मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

